# संस्कृतवार्ताः

दिनाङ्क : 30/06/2025 सायम् : 06:20

**आदौ-मुख्यवार्ताः**

- **राष्ट्रपति-पदासीनया द्रौपदी मुर्मू इत्यनया उक्तं यत्, प्रौद्योगिक्यां पशुचिकित्सायाः, परिचर्यायाः च क्षेत्रे क्रान्तिकारी परिवर्तनं आनेतुं क्षमता वर्तते।**
- **विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकरः श्वः समायोक्ष्यमाणे क्वाड-विदेशमन्त्रिणाम् उपवेशने भागं ग्रहीतुम् अमेरिका देशस्य त्रिदिवसीयायां आधिकारिक्यां यात्रायां गमिष्यति।**
- **विगतदिनद्वये निरन्तरं प्रचण्डवृष्ट्या सम्पूर्णे हिमाचलप्रदेशे द[illegible]न्दिनजीवनं भृशं बाधितं जातम्। ऋतु-विभागस्य अनुसारं दिल्ली, पञ्जाब, उत्तराखण्ड, इत्यादिषु जुलाई-मासस्य पंचमदिनांक-पर्यंतम् अतिवृष्टिः भविष्यति।**
- **सम्पूर्णे यूरोपे तापतरङ्गः प्रचलति। अस्मिन् दक्षिणस्पेनदेशः सर्वाधिकं प्रभावितः अस्ति, एल ग्रानाडो क्षेत्रे तापमानं प्रायः षड् चत्वारिंशत् डिग्री सेल्सियसपर्यन्तं जातम्।**

---

राष्ट्रपति - उत्तर प्रदेश :

राष्ट्रपति-पदासीनया द्रौपदी मुर्मू इत्यनया उक्तं यत्, प्रौद्योगिक्यां पशुचिकित्सायाः, परिचर्यायाः च क्षेत्रे क्रान्तिकारी परिवर्तनं आनेतुं क्षमता वर्तते। अद्य उत्तरप्रदेशस्य बरेलीनगरे भारतीयपशुचिकित्सा-संशोधनसंस्थायाः एकादशतमं दीक्षांतसमारोहं सम्बोधयन्ती द्रौपदीमुर्मूः प्रावोचत् यत्, प्रौद्योगिक्याः उपयोगेन देशे सर्वत्र पशुचिकित्सा-चिकित्सालयाः सशक्ताः भवितुम् अर्हन्ति। राष्ट्रपतिः मुर्मुः प्रोक्तवती यत् जीनोम-सम्पादनस्य, भ्रूणस्थापनप्रौद्योगिक्याः, कृत्रिमबुद्धेः च विश्लेषणम् इत्यादयः अस्मिन् क्षेत्रे क्रान्तिकारी परिवर्तनं आनेतुं शक्नुवन्ति।

राष्ट्रपतिः अवदत्, अद्य, वन् हेल्थ इत्येषा अवधारणा सम्पूर्णे विश्वे महत्त्वं प्राप्नोति। अस्याम् अवधारणायां मनुष्याः, गृहस्थवन्यपशवः च, वनस्पतयः, व्यापकपर्यावरणं च इत्येते सर्वेऽपि परस्परनिर्भराः इति मन्यते। केन्द्रीयकृषि-कल्याणमन्त्री शिवराजसिंहचौहानः उक्तवान् यत् भारतीयपशुचिकित्सा-संशोधनसंस्थायाः शोधकार्यं रोगनिदानं च विश्वाय दिशां प्रदत्तम्। अस्याः संस्थायाः न केवलं पशुचिकित्सासंशोधने अपितु ग्रामीणविकासे अपि प्रमुखा भूमिका अस्ति।

---

डॉ. जयशंकरः-अमेरिका यात्रा

विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकरः अमेरिका देशस्य पञ्चदश्यां यात्रायां गमिष्यति। अमेरिकादेशीय विदेश मन्त्रिणः मार्को रूबियो इत्येतस्य निमन्त्रणे अद्य प्रभृति त्रिदिवसीयायां आधिकारिक्यां यात्रायां डॉ. जयशंकरः अद्य अमेरिकादेशं सम्प्राप्नोत्। एतद्-यात्रान्तर्गतं

डॉ. जयशंकर श्व: समायोक्ष्यमाणे क्वाड-विदेशमन्त्रिणाम् उपवेशने भागं ग्रहीष्यति। विदेशमन्त्रालयस्य वक्तव्यानुसारेण क्वाड समूहः हिन्दप्रशान्ताय सामूहिक दृष्टिकोणस्य संवर्द्धनाय नव प्रस्तावेषु ध्यान-केन्द्रीकरणं करिष्यति। अवधेयं यत् एतत् उपवेशनं पहलगाम आक्रमणानन्तरं क्वाड-मन्त्रिणां प्रथमम् उपवेशनं स्यात्। डॉ. जयशंकरः अद्य न्यूयॉर्क-नगरे संयुक्त-राष्ट्र-मुख्यालये "आंतकवाद की कीमत" इत्याख्याः प्रदर्शन्याः उद्घाटनमपि करिष्यति, यत्र आंतक-कृत्यानां विनाश-परेषु प्रभावेषु चर्चा भविष्यति।

---------------------------------------------------------------------------

प्रधानमन्त्री-विदेशमन्त्रालयः

प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् आरभ्य घाना, त्रिनिदाद टोबैगो च, अर्जेन्टिना, ब्राजील, नामिबिया इति पञ्चराष्ट्रानां यात्रायां भविष्यति। नवदिल्ल्यां विशिष्ट-वार्ताहर-संवादं सम्बोधयन् विदेशमन्त्रालयस्य आर्थिकसम्बन्धसचिवः दम्मूरविः अवदत् यत् प्रधानमन्त्री पञ्चराष्ट्राणां यात्रायाः प्रथमे चरणे आगामिमासस्य द्वितीय-तृतीय-दिनाङ्के घानादेशस्य यात्रां करिष्यति। एतत् तस्य प्रथमं द्विपक्षीयं घानादेशस्य यात्रा भविष्यति। सः अवदत्, यत् श्रीमोदी घानादेशस्य राष्ट्रपतिना सह वार्तालापं करिष्यति। द्वयोः राष्ट्रयोः सशक्तद्विपक्षीयसहभगितायाः समीक्षा भविष्यति तथा च आर्थिक, ऊर्जा, रक्षासहकार्यं, विकाससहकार्यसहभगितां च वर्धयितुं बहुविधचर्चा भविष्यति।

---------------------------------------------------------------------------

प्रधानमन्त्री-हूलदिवसः

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य हुल-दिवसावसरे आदिवासी-समुदायस्य स्वतंत्रता-सेनानिभ्यः श्रद्धांजलिं समार्ययत्। एकस्मिन् अन्तर्जालीयसन्देशे श्रीमोदी अवदत् यत्, अयं दिवसः सर्वेभ्यः सिडो-कान्हु-चान्द-भैरव-फूलो-झानो-सहितानाम् आदिवासी-समुदायानां स्वातन्त्र्य सेनानीनां अदम्य-साहसस्य, उल्लेखनीय-शौर्यस्य च स्मरणं करोति। सः इदमपि प्रावोचत् यत् ते विदेशशासनविरुद्धं युद्धं कुर्वन्तः स्वप्राणान् त्यक्तवन्तः, तेषां वीरतायाः गाथा राष्ट्रस्य प्रत्येकं जनं प्रेरयिष्यति इति।

---------------------------------------------------------------------------

तेलंगाना-विस्फोटः

तेलंगानाराज्यस्य संगरेड्डी-मण्डले एकस्मिन् बृहद्-रासायनिक-औद्योगिकैकक-विस्फोटघटनायां द्वादश श्रमिकाः मृताः, षड्विंशति-जनाः व्रणिताः अभवन्। एतेन विस्फोटेन विशालः अग्निः उत्पन्नः, येनाग्निना सिगाची केमिकल्स् इति परिसरः आक्रान्तोऽभवत्। राष्ट्रिय-आपदोद्धार-दलेन राज्य-आपदोद्धार-दलेन च मिलित्वा स्थानीय प्रशासनस्य सहयोगेन च रक्षाकार्यं प्रचलति। राज्यस्य श्रममन्त्री विवेकवेंकटस्वामी उक्तवान् यत् घटनायाः कारणान्वेषणं प्रचलति। मुख्यमन्त्री रेवन्तरेड्डी आहतानाम् कृते उत्तमचिकित्सासहायतां दातुम् अधिकारिभ्यः निर्देशं दत्तवान्।

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः एवं प्रधानमन्त्री नरेन्द्रमोदी अस्यां घटनायां पीडितानां कृते शोकसंवेदनाः प्रकटितवन्तौ। अन्तर्जालीयसन्देशे राष्ट्रपति-मुर्मूना उक्तं यत् सा दुःखदघटनायाः विषये अतीव दुःखिता अस्ति, शोकग्रस्त-परिवारेभ्यः सा समर्थनं प्रकटितवती। सा आहतानाम् शीघ्रं स्वस्थतायै प्रार्थनां कृतवती। श्रीमोदिना प्रधानमन्त्री-राष्ट्रिय-आपदुद्धार-कोषात् प्रत्येकस्य मृतस्य निकटजनानाम् कृते अनुग्रहराशिरूपेण लक्षद्वयं, दुर्घटनायां व्रणितानां कृते पञ्चाशत्-सहस्ररूप्यकाणां च अनुग्रहः घोषितः।

---

सीतारामन्- भ्रमणम् :

वित्तमन्त्री निर्मला सीतारामन् वर्या जुलाईमासस्य पञ्चम-दिनाङ्कपर्यन्तं स्पेन्, पुर्तगाल, ब्राजील् देशानाम् आधिकारिकयात्रायाम् अस्ति। स्पेनदेशस्य यात्रायाः समये मन्त्री संयुक्तराष्ट्रसङ्घेन आयोजिते "विकासाय वित्तपोषणम्" इत्यस्मिन् विषये चतुर्थे अन्तर्राष्ट्रीयसम्मेलने-FFD4 इत्यस्मिन् भागं गृहीत्वा स्व-वक्तव्यं दास्यति। सम्मेलने नूतनानां उदयमानानाञ्च विषयाणां, तथा च स्थायिविकास-लक्ष्याणां पूर्णतया कार्यान्वयनस्य तत्कालीनावश्यकता, अन्ताराष्ट्रिय-वित्तीय-संरचनायाः पुनरुत्थानस्य समर्थनं च भविष्यति।

---

ऋतुविज्ञानविभागः-

विगतदिनद्वये निरन्तरं प्रचण्डवृष्ट्या सम्पूर्णे हिमाचलप्रदेशे दैनन्दिनजीवनं भृशं बाधितं जातम्। राज्यस्य विभिन्नेभ्यः भागेभ्यः नदीषु जलस्तरस्य संवर्धनस्य भूस्खलनस्य, भवनानां पतनस्य, च घटनाः घटिताः सन्ति। प्रशासनेन जनेभ्यः सतर्कतायाः आग्रहः कृतः। अत्यधिकवृष्टेः पूर्वानुमानस्य कारणात् भूस्खलनस्य च सम्भवानायाः कारणात् च अद्य हिमाचलस्य चतुर्णां मण्डलानां सर्वाः शैक्षणिकसंस्थाः अद्य पिहिताः सन्ति। भारतीय-ऋतु-विज्ञानविभागेन अद्य झारखण्डस्य पृथक् पृथक् स्थानेषु अतिवृष्टेः तथा च शनिवासरपर्यन्तं ओडिशा, बिहार, मध्यप्रदेश, छत्तीसगढ़ इत्येतेषु पृथक् पृथक् स्थानेषु अतिवृष्टेः सम्भावना प्रकटिता अस्ति। ऋतु-विभागस्य अनुसारं अद्य चण्डीगढ, दिल्ली, हिमाचलप्रदेश, कोङ्कण, गोवा, मध्यमहाराष्ट्र, पञ्जाब, उत्तरप्रदेश, उत्तराखण्ड, विदर्भ इत्यादिषु अपि एतादृशाः परिस्थितयः भविष्यन्ति। अद्य-अरुणाचलप्रदेशे, असमे, मेघालये, नागालैण्डे, मणिपुरे, मिजोरमे, त्रिपुरायां, पश्चिमबङ्गे, सिक्किमे च एकान्तस्थानेषु अपि प्रचण्डवृष्टिः भविष्यति इति ऋतु विभागेन पूर्वानुमानं कृतं वर्तते।

---

यूरोप-तापतरङ्गः

सम्पूर्णे यूरोपे तापतरङ्गः प्रचलति। तत्राधुना तापमानं नूतनं स्तरं च स्पृशति। स्वास्थ्यसंचेतनाः, वन्याग्निः च प्रवर्तयन्ति। अस्मिन् दक्षिणस्पेनदेशः सर्वाधिकं प्रभावितः अस्ति, एल ग्रानाडो क्षेत्रे तापमानं प्रायः षड् चत्वारिंशत् डिग्री सेल्सियसपर्यन्तं जातं, यत् जूनमासस्य अधुना यावत् सर्वाधिकं तापमानम् अस्ति। पुर्तगाल-इटली, क्रोएशिया-देशानां केषुचित् भागेषु रेड-अलर्ट संचेतना प्रसारिता अस्ति, यत्र हि पश्चिम-मध्य-यूरोप-देशस्य अधिकांशेषु भागेषु एम्बर-अलर्ट संचेतनाः प्रसारिताः सन्ति।

॥ इति वार्ताः ॥